# Shrisuryasahasranamastotram 2

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : sUryasahasranAmastotram 2

File name : sUryasahasranAmastotra.itx

Category : sahasranAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : DPD

Proofread by : DPD, Sunder Hattanagdi

Description-comments : rudrayAmalatantre devIrahasye paTala 34. See corresponding Namavali. dwarkadheeshvastu.com sUrya upAsanA

Latest update : May 2, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ ૨

શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે

અથ ચતુસ્ત્રિંશઃ પટલઃ ।

શ્રીભૈરવ ઉવાચ ।
દેવદેવિ મહાદેવિ સર્વાભયવરપ્રદે ।
ત્વં મે પ્રાણપ્રિયા પ્રીતા વરદોઽહં તવ સ્થિતઃ ॥ ૧॥

કિઞ્ચિત્ પ્રાર્થય મે પ્રેમ્ણા વક્ષ્યે તત્તે દદામ્યહમ્ ।

શ્રીદેવ્યુવાચ ।
ભગવન્ દેવદેવેશ મહારુદ્ર મહેશ્વર ॥ ૨॥

યદિ દેયો વરો મહ્યં વરયોગ્યાસ્મ્યહં યદિ ।
દેવદેવસ્ય સવિતુર્વદ નામસહસ્રકમ્ ॥ ૩॥

શ્રીભૈરવ ઉવાચ ।
એતદ્ગુહ્યતમં દેવિ સર્વસ્વં મમ પાર્વતિ ।
રહસ્યં સર્વદેવાનાં દુર્લભં કામનાવહમ્ ॥ ૪॥

યો દેવો ભગવાન્ સૂર્યો વેદકર્તા પ્રજાપતિઃ ।
કર્મસાક્ષી જગચ્ચક્ષુઃ સ્તોતું તં કેન શક્યતે ॥ ૫॥

યસ્યાદિર્મધ્યમન્તં ચ સુરૈરપિ ન ગમ્યતે ।
તસ્યાદિદેવદેવસ્ય સવિતુર્જગદીશિતુઃ ॥ ૬॥

મન્ત્રનામસહસ્રં તે વક્ષ્યે સામ્રાજ્યસિદ્ધિદમ્ ।
સર્વપાપાપહં દેવિ તન્ત્રવેદાગમોદ્ધૃતમ્ ॥ ૭॥

માઙ્ગલ્યં પૌષ્ટિકં ચૈવ રક્ષોઘ્નં પાવનં મહત્ ।
સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ॥ ૮॥

ધનદં પુણ્યદં પુણ્યં શ્રેયસ્કરં યશસ્કરમ્ ।

વક્ષ્યામિ પરમં તત્ત્વં મૂલવિદ્યાત્મકં પરમ્ ॥ ૯॥

બ્રહ્મણો યત્ પરં બ્રહ્મ પરાણામપિ યત્ પરમ્ ।
મન્ત્રાણામપિ યત્ તત્ત્વં મહસામપિ યન્મહઃ ॥ ૧૦॥

શાન્તાનામપિ યઃ શાન્તો મનૂનામપિ યો મનુઃ ।
યોગિનામપિ યો યોગી વેદાનાં પ્રણવશ્ચ યઃ ॥ ૧૧॥

ગ્રહાણામપિ યો ભાસ્વાન્ દેવાનામપિ વાસવઃ ।
તારાણામપિ યો રાજા વાયૂનાં ચ પ્રભઞ્જનઃ ॥ ૧૨॥

ઇન્દ્રિયાણામપિ મનો દેવીનામપિ યઃ પરા ।
નગાનામપિ યો મેરુઃ પન્નગાનાં ચ વાસુકિઃ ॥ ૧૩॥

તેજસામપિ યો વહ્નિઃ કારણાનાં ચ યઃ શિવઃ ।
સવિતા યસ્તુ ગાયત્ર્યાઃ પરમાત્મેતિ કીર્ત્યતે ॥ ૧૪॥

વક્ષ્યે પરમહંસસ્ય તસ્ય નામસહસ્રકમ્ ।
સર્વદારિદ્ર્યશમનં સર્વદુઃખવિનાશનમ્ ॥ ૧૫॥

સર્વપાપપ્રશમનં સર્વતીર્થફલપ્રદમ્ ।
જ્વરરોગાપમૃત્યુઘ્નં સદા સર્વાભયપ્રદમ્ ॥ ૧૬॥

તત્ત્વં પરમતત્ત્વં ચ સર્વસારોત્તમોત્તમમ્ ।
રાજપ્રસાદવિજય-લક્ષ્મીવિભવકારણમ્ ॥ ૧૭॥

આયુષ્કરં પુષ્ટિકરં સર્વયજ્ઞફલપ્રદમ્ ।
મોહનસ્તમ્ભનાકૃષ્ટિ-વશીકરણકારણમ્ ॥ ૧૮॥

અદાતવ્યમભક્તાય સર્વકામપ્રપૂરકમ્ ।
શ઼ૃણુષ્વાવહિતા ભૂત્વા સૂર્યનામસહસ્રકમ્ ॥ ૧૯॥

અસ્ય શ્રીસૂર્યનામસહસ્રસ્ય શ્રીબ્રહ્મા ઋષિઃ । ગાયત્ર્યં છન્દઃ ।
શ્રીભગવાન્ સવિતા દેવતા । હ્રાં બીજમ્ । સઃ શક્તિઃ । હ્રીં કીલકમ્ ।
ધર્માર્થકામમોક્ષાર્થે સૂર્યસહસ્રનામપાઠે વિનિયોગઃ ॥

ધ્યાનમ્ ॥

કલ્પાન્તાનલકોટિભાસ્વરમુખં સિન્દૂરધૂલીજપા-
વર્ણં રત્નકિરીટિનં દ્વિનયનં શ્વેતાબ્જમધ્યાસનમ્ ।
નાનાભૂષણભૂષિતં સ્મિતમુખં રક્તામ્બરં ચિન્મયં

સૂર્યં સ્વર્ણસરોજરત્નકલશૌ દોર્ભ્યાં દધાનં ભજે ॥ ૧॥

પ્રત્યક્ષદેવં વિશદં સહસ્રમરીચિભિઃ શોભિતભૂમિદેશમ્ ।
સપ્તાશ્વગં સદ્ધ્વજહસ્તમાદ્યં દેવં ભજેઽહં મિહિરં હૃદબ્જે ॥ ૨॥

ૐ હ્રાં હ્રીં સઃ હં સઃ સોઽહં સવિતા ભાસ્કરો ભગઃ ।
ભગવાન્ સર્વલોકેશો ભૂતેશો ભૂતભાવનઃ ॥ ૩॥

ભૂતાત્મા સૃષ્ટિકૃત્ સ્રષ્ટા કર્તા હર્તા જગત્પતિઃ ।
આદિત્યો વરદો વીરો વીરલો વિશ્વદીપનઃ ॥ ૪॥

વિશ્વકૃદ્ વિશ્વહૃદ્ ભક્તો ભોક્તા ભીમોઽભયાપહઃ ।
વિશ્વાત્મા પુરુષઃ સાક્ષી પરં બ્રહ્મ પરાત્ પરઃ ॥ ૫॥

પ્રતાપવાન્ વિશ્વયોનિર્વિશ્વેશો વિશ્વતોમુખઃ ।
કામી યોગી મહાબુદ્ધિર્મનસ્વી મનુરવ્યયઃ ॥ ૬॥

પ્રજાપતિર્વિશ્વવન્દ્યો વન્દિતો ભુવનેશ્વરઃ ।
ભૂતભવ્યભવિષ્યાત્મા તત્ત્વાત્મા જ્ઞાનવાન્ ગુણી ॥ ૭॥

સાત્ત્વિકો રાજસસ્તામસ્તમવી કરુણાનિધિઃ ।
સહસ્રકિરણો ભાસ્વાન્ ભાર્ગવો ભૃગુરીશ્વરઃ ॥ ૮॥

નિર્ગુણો નિર્મમો નિત્યો નિત્યાનન્દો નિરાશ્રયઃ ।
તપસ્વી કાલકૃત્ કાલઃ કમનીયતનુઃ કૃશઃ ॥ ૯॥

દુર્દર્શઃ સુદશો દાશો દીનબન્ધુર્દયાકરઃ ।
દ્વિભુજોઽષ્ટભુજો ધીરો દશબાહુર્દશાતિગઃ ॥ ૧૦॥

દશાંશફલદો વિષ્ણુર્જિગીષુર્જયવાઞ્જયી ।
જટિલો નિર્ભયો ભાનુઃ પદ્મહસ્તઃ કુશીરકઃ ॥ ૧૧॥

સમાહિતગતિર્ધાતા વિધાતા કૃતમઙ્ગલઃ ।
માર્તણ્ડો લોકધૃત્ ત્રાતા રુદ્રો ભદ્રપ્રદઃ પ્રભુઃ ॥ ૧૨॥

અરાતિશમનઃ શાન્તઃ શઙ્કરઃ કમલાસનઃ ।
અવિચિન્ત્યવપુઃ (૧૦૦) શ્રેષ્ઠો મહાચીનક્રમેશ્વરઃ ॥ ૧૩॥

મહાર્તિદમનો દાન્તો મહામોહહરો હરિઃ ।
નિયતાત્મા ચ કાલેશો દિનેશો ભક્તવત્સલઃ ॥ ૧૪॥

કલ્યાણકારી કમઠકર્કશઃ કામવલ્લભઃ ।
વ્યોમચારી મહાન્ સત્યઃ શમ્ભુરમ્ભોજવલ્લભઃ ॥ ૧૫॥

સામગઃ પઞ્ચમો દ્રવ્યો ધ્રુવો દીનજનપ્રિયઃ ।
ત્રિજટો રક્તવાહશ્ચ રક્તવસ્ત્રો રતિપ્રિયઃ ॥ ૧૬॥

કાલયોગી મહાનાદો નિશ્ચલો દૃશ્યરૂપધૃક્ ।
ગમ્ભીરઘોષો નિર્ઘોષો ઘટહસ્તો મહોમયઃ ॥ ૧૭॥

રક્તામ્બરધરો રક્તો રક્તમાલ્યાનુલેપનઃ ।
સહસ્રહસ્તો વિજયો હરિગામી હરીશ્વરઃ ॥ ૧૮॥

મુણ્ડઃ કુણ્ડી ભુજઙ્ગેશો રથી સુરથપૂજિતઃ ।
ન્યગ્રોધવાસી ન્યગ્રોધો વૃક્ષકર્ણઃ કુલન્ધરઃ ॥ ૧૯॥

શિખી ચણ્ડી જટી જ્વાલી જ્વાલાતેજોમયો વિભુઃ ।
હૈમો હેમકરો હારી હરિદ્રલાસનસ્થિતઃ ॥ ૨૦॥

હરિદ્શ્વો જગદ્વાસી જગતાં પતિરિઙ્ગિલઃ ।
વિરોચનો વિલાસી ચ વિરૂપાક્ષો વિકર્તનઃ ॥ ૨૧॥

વિનાયકો વિભાસશ્ચ ભાસો ભાસાં પતિઃ પ્રભુઃ ।
મતિમાન્ રતિમાન્ સ્વક્ષો વિશાલાક્ષો વિશામ્પતિઃ ॥ ૨૨॥

બાલરૂપો ગિરિચરો ગીર્પતિર્ગોમતીપતિઃ ।
ગઙ્ગાધરો ગણાધ્યક્ષો ગણસેવ્યો ગણેશ્વરઃ ॥ ૨૩॥

ગિરીશનયનાવાસી સર્વવાસી સતીપ્રિયઃ ।
સત્યાત્મકઃ સત્યધરઃ સત્યસન્ધઃ સહસ્રગુઃ ॥ ૨૪॥

અપારમહિમા મુક્તો મુક્તિદો મોક્ષકામદઃ ।
મૂર્તિમાન્ ( ૨૦૦) દુર્ધરોઽમૂર્તિસ્તુટિરૂપો લવાત્મકઃ ॥ ૨૫॥

પ્રાણેશો વ્યાનદોઽપાનસમાનોદાનરૂપવાન્ ।
ચષકો ઘટિકારૂપો મુહૂર્તો દિનરૂપવાન્ ॥ ૨૬॥

પક્ષો માસ ઋતુર્વર્ષા દિનકાલેશ્વરેશ્વરઃ ।
અયનં યુગરૂપશ્ચ કૃતં ત્રેતાયુગસ્ત્રિપાત્ ॥ ૨૭॥

દ્વાપરશ્ચ કલિઃ કાલઃ કાલાત્મા કલિનાશનઃ ।
મન્વન્તરાત્મકો દેવઃ શક્રસ્ત્રિભુવનેશ્વરઃ ॥ ૨૮॥

વાસવોઽગ્નિર્યમો રક્ષો વરુણો યાદસાં પતિઃ ।
વાયુર્વૈશ્રવણં શૈવ્યો ગિરિજો જલજાસનઃ ॥ ૨૩॥

અનન્તોઽનન્તમહિમા પરમેષ્ઠી ગતજ્વરઃ ।
કલ્પાન્તકલનઃ ક્રૂરઃ કાલાગ્નિઃ કાલસૂદનઃ ॥ ૩૦॥

મહાપ્રલયકૃત્ કૃત્યઃ કુત્યાશીર્યુગવર્તનઃ ।
કાલાવર્તો યુગધરો યુગાદિઃ શહકેશ્વરઃ ॥ ૩૧॥

આકાશનિધિરૂપશ્ચ સર્વકાલપ્રવર્તકઃ ।
અચિન્ત્યઃ સુબલો બાલો બલાકાવલ્લભો વરઃ ॥ ૩૨॥

વરદો વીર્યદો વાગ્મી વાક્પતિર્વાગ્વિલાસદઃ ।
સાઙ્ખ્યેશ્વરો વેદગમ્યો મન્ત્રેશસ્તન્ત્રનાયકઃ ॥ ૩૩॥

કુલાચારપરો નુત્યો નુતિતુષ્ટો નુતિપ્રિયઃ ।
અલસસ્તુલસીસેવ્યસ્તુષ્ટા રોગનિબર્હણઃ ॥ ૩૪॥

પ્રસ્કન્દનો વિભાગશ્ચ નીરાગો દશદિક્પતિઃ ।
વૈરાગ્યદો વિમાનસ્થો રત્નકુમ્ભધરાયુધઃ ॥ ૩૫॥

મહાપાદો મહાહસ્તો મહાકાયો મહાશયઃ ।
ઋગ્યજુઃસામરૂપશ્ચ ત્વષ્ટાથર્વણશાખિલઃ ॥ ૩૬॥

સહસ્રશાખી સદ્વૃક્ષો મહાકલ્પપ્રિયઃ પુમાન્ ।
કલ્પવૃક્ષશ્ચ મન્દારો ( ૩૦૦) મન્દારાચલશોભનઃ ॥ ૩૭॥

મેરુર્હિમાલયો માલી મલયો મલયદ્રુમઃ ।
સન્તાનકુસુમચ્છન્નઃ સન્તાનફલદો વિરાટ્ ॥ ૩૮॥

ક્ષીરામ્ભોધિર્ઘૃતામ્ભોધિર્જલધિઃ ક્લેશનાશનઃ ।
રત્નાકરો મહામાન્યો વૈણ્યો વેણુધરો વણિક્ ॥ ૩૯॥

વસન્તો મારસામન્તો ગ્રીષ્મઃ કલ્મષનાશનઃ ।
વર્ષાકાલો વર્ષપતિઃ શરદમ્ભોજવલ્લભઃ ॥ ૪૦॥

હેમન્તો હેમકેયૂરઃ શિશિરઃ શિશુવીર્યદઃ ।
સુમતિઃ સુગતિઃ સાધુર્વિષ્ણુઃ સામ્બોઽમ્બિકાસુતઃ ॥ ૪૧॥

સારગ્રીવો મહારાજઃ સુનન્દો નન્દિસેવિતઃ ।

સુમેરુશિખરાવાસી સપ્તપાતાલગોચરઃ ॥ ૪૨॥

આકાશચારી નિત્યાત્મા વિભુત્વવિજયપ્રદઃ ।
કુલકાન્તઃ કુલાદ્રીશો વિનયી વિજયી વિયત્ ॥ ૪૩॥

વિશ્વમ્ભરા વિયચ્ચારી વિયદ્રૂપો વિયદ્રથઃ ।
સુરથઃ સુગતસ્તુત્યો વેણુવાદનતત્પરઃ ॥ ૪૪॥

ગોપાલો ગોમયો ગોપ્તા પ્રતિષ્ઠાયી પ્રજાપતિઃ ।
આવેદનીયો વેદાક્ષો મહાદિવ્યવપુઃ સુરાટ્ ॥ ૪૫॥

નિર્જીવો જીવનો મન્ત્રી મહાર્ણવનિનાદભૃત્ ।
વસુરાવર્તનો નિત્યઃ સર્વામ્નાયપ્રભુઃ સુધીઃ ॥ ૪૬॥

ન્યાયનિર્વાપણઃ શૂલી કપાલી પદ્મમધ્યગઃ ।
ત્રિકોણનિલયશ્ચેત્યો બિન્દુમણ્ડલમધ્યગઃ ॥ ૪૭॥

બહુમાલો મહામાલો દિવ્યમાલાધરો જપઃ ।
જપાકુસુમસઙ્કાશો જપપૂજાફલપ્રદઃ ॥ ૪૮॥

સહસ્રમૂર્ધા દેવેન્દ્રઃ સહસ્રનયનો રવિઃ ।
સર્વતત્ત્વાશ્રયો બ્રધ્નો વીરવન્દ્યો વિભાવસુઃ ॥ ૪૯॥

વિશ્વાવસુર્વસુપતિર્વસુનાથો વિસર્ગવાન્ ।
આદિરાદિત્યલોકેશઃ સર્વગામી (૪૦૦) કલાશ્રયઃ ॥ ૫૦॥

ભોગેશો દેવદેવેન્દ્રો નરેન્દ્રો હવ્યવાહનઃ ।
વિદ્યાધરેશો વિદ્યેશો યક્ષેશો રક્ષણો ગુરુઃ ॥ ૫૧॥

રક્ષઃકુલૈકવરદો ગન્ધર્વકુલપૂજિતઃ ।
અપ્સરોવન્દિતોઽજય્યો જેતા દૈત્યનિબર્હણઃ ॥ ૫૨॥

ગુહ્યકેશઃ પિશાચેશઃ કિન્નરીપૂજિતઃ કુજઃ ।
સિદ્ધસેવ્યઃ સમામ્નાયઃ સાધુસેવ્યઃ સરિત્પતિઃ ॥ ૫૩॥

લલાટાક્ષો વિશ્વદેહો નિયમી નિયતેન્દ્રિયઃ ।
અર્કોઽર્કકાન્તરત્નેશોઽનન્તબાહુરલોપકઃ ॥ ૫૪॥

અલિપાત્રધરોઽનઙ્ગોઽપ્યમ્બરેશોઽમ્બરાશ્રયઃ ।
અકારમાતૃકાનાથો દેવાનામાદિરાકૃતિઃ ॥ ૫૫॥

આરોગ્યકારી ચાનન્દવિગ્રહો નિગ્રહો ગ્રહઃ ।
આલોકકૃત્ તથાદિત્યો વીરાદિત્યઃ પ્રજાધિપઃ ॥ ૫૬॥

આકાશરૂપઃ સ્વાકાર ઇન્દ્રાદિસુરપૂજિતઃ ।
ઇન્દિરાપૂજિતશ્ચેન્દુરિન્દ્રલોકાશ્રયસ્ત્વિનઃ ॥ ૫૭॥

ઈશાન ઈશ્વરશ્ચન્દ્ર ઈશ ઈકારવલ્લભઃ ।
ઉન્નતાસ્યોઽપ્યુરુવપુરુન્નતાદ્રિચરો ગુરુઃ ॥ ૫૮॥

ઉત્પલોઽપ્યુચ્ચલત્કેતુરુચ્ચૈર્હયગતિઃ સુખી ।
ઉકારાકારસુખિતસ્તથોષ્મા નિધિરૂષણઃ ॥ ૫૯॥

અનૂરુસારથિશ્ચોષ્ણભાનુરૂકારવલ્લભઃ ।
ઋણહર્તા ૠલિહસ્ત ઋૠભૂષણભૂષિતઃ ॥ ૬૦॥

લૃમાઙ્ગ લૄમનુસ્થાયી લૃલૄગણ્ડયુગોજ્જ્વલઃ ।
એણાઙ્કામૃતદશ્ચીનપટ્ટભૃદ્ બહુગોચરઃ ॥ ૬૧॥

એકચક્રધરશ્ચૈકોઽનેકચક્ષુસ્તથૈક્યદઃ ।
એકારબીજરમણ એઐઓષ્ઠામૃતાકરઃ ॥ ૬૨॥

ઓઙ્કારકારણં બ્રહ્મ ઔકારૌચિત્યમણ્ડનઃ ।
ઓઔદન્તાલિરહિતો મહિતો મહતાં પતિઃ ॥ ૬૩॥

અંવિદ્યાભૂષણો ભૂષ્યો લક્ષ્મીશોઽમ્બીજરૂપવાન્ ।
અઃસ્વરૂપઃ (૫૦૦) સ્વરમયઃ સર્વસ્વરપરાત્મકઃ ॥ ૬૪॥

અંઅઃસ્વરૂપમન્ત્રાઙ્ગઃ કલિકાલનિવર્તકઃ ।
કર્મૈકવરદઃ કર્મસાક્ષી કલ્મષનાશનઃ ॥ ૬૫॥

કચધ્વંસી ચ કપિલઃ કનકાચલચારકઃ ।
કાન્તઃ કામઃ કપિઃ ક્રૂરઃ કીરઃ કેશિનિસૂદનઃ ॥ ૬૬॥ કેશારિસૂદનઃ

કૃષ્ણઃ કાપાલિકઃ કુબ્જઃ કમલાશ્રયણઃ કુલી ।
કપાલમોચકઃ કાશઃ કાશ્મીરઘનસારભૃત્ ॥ ૬૭॥

કૂજત્કિન્નરગીતેષ્ટઃ કુરુરાજઃ કુલન્ધરઃ ।
કુવાસી કુલકૌલેશઃ કકારાક્ષરમણ્ડનઃ ॥ ૬૮॥

ખવાસી ખેટકેશાનઃ ખડ્ગમુણ્ડધરઃ ખગઃ ।
ખગેશ્વરશ્ચ ખચરઃ ખેચરીગણસેવિતઃ ॥ ૬૯॥

ખરાંશુઃ ખેટકધરઃ ખલહર્તા ખવર્ણકઃ ।
ગન્તા ગીતપ્રિયો ગેયો ગયાવાસી ગણાશ્રયઃ  ॥ ૭૦॥

ગુણાતીતો ગોલગતિર્ગુચ્છલો ગુણિસેવિતઃ ।
ગદાધરો ગદહરો ગાઙ્ગેયવરદઃ પ્રગી ॥ ૭૧॥

ગિઙ્ગિલો ગટિલો ગાન્તો ગકારાક્ષરભાસ્કરઃ
ઘૃણિમાન્ ઘુર્ઘુરારાવો ઘણ્ટાહસ્તો ઘટાકરઃ ॥ ૭૨॥

ઘનચ્છન્નો ઘનગતિર્ઘનવાહનતર્પિતઃ ।
ઙાન્તો ઙેશો ઙકારાઙ્ગશ્ચન્દ્રકુઙ્કુમવાસિતઃ ॥ ૭૩॥

ચન્દ્રાશ્રયશ્ચન્દ્રધરોઽચ્યુતશ્ચમ્પકસન્નિભઃ ।
ચામીકરપ્રભશ્ચણ્ડભાનુશ્ચણ્ડેશવલ્લભઃ ॥ ૭૪॥

ચઞ્ચચ્ચકોરકોકેષ્ટશ્ચપલશ્ચપલાશ્રયઃ ।
ચલત્પતાકશ્ચણ્ડાદ્રિશ્ચીવરૈકધરોઽચરઃ ॥ ૭૫॥

ચિત્કલાવર્ધિતશ્ચિન્ત્યશ્ચિન્તાધ્વંસી ચવર્ણવાન્ ।
છત્રભૃચ્છલહૃચ્છન્દચ્છુરિકાચ્છિન્નવિગ્રહઃ ॥ ૭૬॥

જામ્બૂનદાઙ્ગદોઽજાતો જિનેન્દ્રો જમ્બુવલ્લભઃ ।
જમ્વારિર્જઙ્ગિટો જઙ્ગી જનલોકતમોપહઃ ॥ ૭૭॥

જયકારી (૬૦૦) જગદ્ધર્તા જરામૃત્યુવિનાશનઃ ।
જગત્ત્રાતા જગદ્ધાતા જગદ્ધ્યેયો જગન્નિધિઃ ॥ ૭૮॥

જગત્સાક્ષી જગચ્ચક્ષુર્જગન્નાથપ્રિયોઽજિતઃ ।
જકારાકારમુકુટો ઝઞ્જાછન્નાકૃતિર્ઝટઃ ॥ ૭૯॥

ઝિલ્લીશ્વરો ઝકારેશો ઝઞ્જાઙ્ગુલિકરામ્બુજઃ ।
ઞઞાક્ષરાઞ્ચિતષ્ટઙ્કુષ્ટિટ્ટિભાસનસંસ્થિતઃ ॥ ૮૦॥

ટીત્કારષ્ટઙ્કુધારી ચ ઠઃસ્વરૂપષ્ઠઠાધિપઃ ।
ડમ્ભરો ડામરુર્ડિણ્ડી ડામરીશો ડલાકૃતિઃ ॥ ૮૧॥

ડાકિનીસેવિતો ડાઢી ડઢગુલ્ફાઙ્ગુલિપ્રભઃ ।
ણેશપ્રિયો ણવર્ણેશો ણકારપદપઙ્કજઃ ॥ ૮૨॥

તારાધિપેશ્વરસ્તથ્યસ્તન્ત્રીવાદનતત્પરઃ ।

ત્રિપુરેશસ્ત્રિનેત્રેશસ્ત્રયીતનુરધોક્ષજઃ ॥ ૮૩॥

તામસ્તામરસેષ્ટશ્ચ તમોહર્તા તમોરિપુઃ ।
તન્દ્રાહર્તા તમોરૂપસ્તપસાં ફલદાયકઃ ॥ ૮૪॥

તુટ્યાદિકલનાકાન્તસ્તકારાક્ષરભૂષણઃ ।
સ્થાણુસ્થલીસ્થિતો નિત્યં સ્થવિરઃ સ્થણ્ડિલ સ્થુલઃ ॥ ૮૫॥

થકારજાનુરધ્યાત્મા દેવનાયકનાયકઃ ।
દુર્જયો દુઃખહા દાતા દારિદ્ર્યચ્છેદનો દમી ॥ ૮૬॥

દૌર્ભાગ્યહર્તા દેવેન્દ્રો દ્વાદશારાબ્જમધ્યગઃ ।
દ્વાદશાન્તૈકવસતિર્દ્વાદશાત્મા દિવસ્પતિઃ ॥ ૮૭॥

દુર્ગમો દૈત્યશમનો દૂરગો દુરતિક્રમઃ ।
દુર્ધ્યેયો દુષ્ટવંશઘ્નો દયાનાથો દયાકુલઃ ॥ ૮૮॥

દામોદરો દીધિતિમાન્ દકારાક્ષરમાતૃકઃ ।
ધર્મબન્ધુર્ધર્મનિધિર્ધર્મરાજો ધનપ્રદઃ ॥ ૮૯॥

ધનદેષ્ટો ધનાધ્યક્ષો ધરાદર્શો ધુરન્ધરઃ ।
ધૂર્જટીક્ષણવાસી ચ ધર્મક્ષેત્રો ધરાધિપઃ ॥ ૯૦॥

ધારાધરો ધુરીણશ્ચ ધર્માત્મા ધર્મવત્સલઃ ।
ધરાભૃદ્વલ્લભો ધર્મી ધકારાક્ષરભૂષણઃ ॥ ૯૧॥

નમપ્રિયો નન્દિરુદ્રો ( ૭૦૦) નેતા નીતિપ્રિયો નયી ।
નલિનીવલ્લભો નુન્નો નાટ્યકૃન્નાટ્યવર્ધનઃ ॥ ૯૨॥

નરનાથો નૃપસ્તુત્યો નભોગામી નમઃપ્રિયઃ ।
નમોન્તો નમિતારાતિર્નરનારાયણાશ્રયઃ ॥ ૯૩॥

નારાયણો નીલરુચિર્નમ્રાઙ્ગો નીલલોહિતઃ ।
નાદરૂપો નાદમયો નાદબિન્દુસ્વરૂપકઃ ॥ ૯૪॥

નાથો નાગપતિર્નાગો નગરાજાશ્રિતો નગઃ ।
નાકસ્થિતોઽનેકવપુર્નકારાક્ષરમાતૃકઃ ॥ ૯૫॥

પદ્માશ્રયઃ પરં જ્યોતિઃ પીવરાંસઃ પુટેશ્વરઃ ।
પ્રીતિપ્રિયઃ પ્રેમકરઃ પ્રણતાર્તિભયાપહઃ ॥ ૯૬॥

પરત્રાતા પરધ્વંસી પુરારિઃ પુરસંસ્થિતઃ ।
પૂર્ણાનન્દમયઃ પૂર્ણતેજાઃ પૂર્ણેશ્વરીશ્વરઃ ॥ ૯૭॥

પટોલવર્ણઃ પટિમા પાટલેશઃ પરાત્મવાન્ ।
પરમેશવપુઃ પ્રાંશુઃ પ્રમત્તઃ પ્રણતેષ્ટદઃ ॥ ૯૮॥

અપારપારદઃ પીનઃ પીતામ્બરપ્રિયઃ પવિઃ ।
પાચનઃ પિચુલઃ પ્લુષ્ટઃ પ્રમદાજનસૌખ્યદઃ ॥ ૯૯॥

પ્રમોદી પ્રતિપક્ષઘ્નઃ પકારાક્ષરમાતૃકઃ ।
ફલં ભોગાપવર્ગસ્ય ફલિનીશઃ ફલાત્મકઃ ॥ ૧૦૦॥

ફુલ્લદમ્ભોજમધ્યસ્થઃ ફુલ્લદમ્ભોજધારકઃ ।
સ્ફુટદ્યોતિઃ સ્ફુટાકારઃ સ્ફટિકાચલચારકઃ ॥ ૧૦૨॥

સ્ફૂર્જત્કિરણમાલી ચ ફકારાક્ષરપાર્શ્વકઃ ।
બાલો બલપ્રિયો બાન્તો બિલધ્વાન્તહરો બલી ॥ ૧૦૩॥

બાલાદિર્બર્બરધ્વંસી બબોલામૃતપાનકઃ ।
બુધો બૃહસ્પતિર્વૃક્ષો બૃહદશ્વો બૃહદ્ગતિઃ ॥ ૧૦૪॥

બપૃષ્ઠો ભીમરૂપશ્ચ ભામયો ભેશ્વરપ્રિયઃ ।
ભગો ભૃગુર્ભૃગુસ્થાયી ભાર્ગવઃ કવિશેખરઃ ॥ ૧૦૫॥

ભાગ્યદો ભાનુદીપ્તાઙ્ગો ભનાભિશ્ચ ભમાતૃકઃ ।
મહાકાલો (૮૦૦) મહાધ્યક્ષો મહાનાદો મહામતિઃ ॥ ૧૦૬॥

મહોજ્જ્વલો મનોહારી મનોગામી મનોભવઃ ।
માનદો મલ્લહા મલ્લો મેરુમન્દરમન્દિરઃ ॥ ૧૦૭॥

મન્દારમાલાભરણો માનનીયો મનોમયઃ ।
મોદિતો મદિરાહારો માર્તણ્ડો મુણ્ડમુણ્ડિતઃ ॥ ૧૦૮॥

મહાવરાહો મીનેશો મેષગો મિથુનેષ્ટદઃ ।
મદાલસોઽમરસ્તુત્યો મુરારિવરદો મનુઃ ॥ ૧૦૯॥

માધવો મેદિનીશશ્ચ મધુકૈટભનાશનઃ ।
માલ્યવાન્ મેધનો મારો મેધાવી મુસલાયુધઃ ॥ ૧૧૦॥

મુકુન્દો મુરરીશાનો મરાલફલદો મદઃ ।
મદનો મોદકાહારો મકારાક્ષરમાતૃકઃ ॥ ૧૧૧॥

યજ્વા યજ્ઞેશ્વરો યાન્તો યોગિનાં હૃદયસ્થિતઃ ।
યાત્રિકો યજ્ઞફલદો યાયી યામલનાયકઃ ॥ ૧૧૨॥

યોગનિદ્રાપ્રિયો યોગકારણં યોગિવત્સલઃ ।
યષ્ટિધારી ચ યન્ત્રેશો યોનિમણ્ડલમધ્યગઃ ॥ ૧૧૩॥

યુયુત્સુજયદો યોદ્ધા યુગધર્માનુવર્તકઃ ।
યોગિનીચક્રમધ્યસ્થો યુગલેશ્વરપૂજિતઃ ॥ ૧૧૪॥

યાન્તો યક્ષૈકતિલકો યકારાક્ષરભૂષણઃ ।
રામો રમણશીલશ્ચ રત્નભાનૂ રુરુપ્રિયઃ ॥ ૧૧૫॥

રત્નમૌલી રત્નતુઙ્ગો રત્નપીઠાન્તરસ્થિતઃ ।
રત્નાંશુમાલી રત્નાઢ્યો રત્નકઙ્કણનૂપુરઃ ॥ ૧૧૬॥

રત્નાઙ્ગદલસદ્બાહૂ રત્નપાદુકમણ્ડિતઃ ।
રોહિણીશાશ્રયો રક્ષાકરો રાત્રિઞ્ચરાન્તકઃ ॥ ૧૧૭॥

રકારાક્ષરરૂપશ્ચ લજ્જાબીજાશ્રિતો લવઃ ।
લક્ષ્મીભાનુર્લતાવાસી લસત્કાન્તિશ્ચ લોકભૃત્ ॥ ૧૧૮॥

લોકાન્તકહરો લામાવલ્લભો લોમશોઽલિગઃ ।
લિઙ્ગેશ્વરો લિઙ્ગનાદો લીલાકારી લલમ્બુસઃ ॥ ૧૧૯॥

લક્ષ્મીવાઁલ્લોકવિધ્વંસી લકારાક્ષરભૂષણઃ ।
વામનો વીરવીરેન્દ્રો વાચાલો (૯૦૦) વાક્પતિપ્રિયઃ ॥ ૧૨૦॥

વાચામગોચરો વાન્તો વીણાવેણુધરો વનમ્ ।
વાગ્ભવો વાલિશધ્વંસી વિદ્યાનાયકનાયકઃ ॥ ૧૨૧॥

વકારમાતૃકામૌલિઃ શામ્ભવેષ્ટપ્રદઃ શુકઃ ।
શશી શોભાકરઃ શાન્તઃ શાન્તિકૃચ્છમનપ્રિયઃ ॥ ૧૨૨॥

શુભઙ્કરઃ શુક્લવસ્ત્રઃ શ્રીપતિઃ શ્રીયુતઃ શ્રુતઃ ।
શ્રુતિગમ્યઃ શરદ્બીજમણ્ડિતઃ શિષ્ટસેવિતઃ ॥ ૧૨૩॥

શિષ્ટાચારઃ શુભાચારઃ શેષઃ શેવાલતાડનઃ ।
શિપિવિષ્ટઃ શિબિઃ  શુક્રસેવ્યઃ શાક્ષરમાતૃકઃ ॥ ૧૨૪॥

ષડાનનઃ ષટ્કરકઃ ષોડશસ્વરભૂષિતઃ ।

ષટ્પદસ્વનસન્તોષી ષડામ્નાયપ્રવર્તકઃ ॥ ૧૨૫॥

ષડ્સાસ્વાદસન્તુષ્ટઃ ષકારાક્ષરમાતૃકઃ ।
સૂર્યભાનુઃ સૂરભાનુઃ સૂરિભાનુઃ સુખાકરઃ ॥ ૧૨૬॥

સમસ્તદૈત્યવંશઘ્નઃ સમસ્તસુરસેવિતઃ ।
સમસ્તસાધકેશાનઃ સમસ્તકુલશેખરઃ ॥ ૧૨૭॥

સુરસૂર્યઃ સુધાસૂર્યઃ સ્વઃસૂર્યઃ સાક્ષરેશ્વરઃ ।
હરિત્સૂર્યો હરિદ્ભાનુર્હવિર્ભુગ્ હવ્યવાહનઃ ॥ ૧૨૮॥

હાલાસૂર્યો હોમસૂર્યો હુતસૂર્યો હરીશ્વરઃ ।
હ્રામ્બીજસૂર્યો હ્રીંસૂર્યો હકારાક્ષરમાતૃકઃ ॥ ૧૨૯॥

ળમ્બીજમણ્ડિતઃ સૂર્યઃ ક્ષોણીસૂર્યઃ ક્ષમાપતિઃ ।
ક્ષુત્સૂર્યઃ ક્ષાન્તસૂર્યશ્ચ  ળક્ષઃસૂર્યઃ સદાશિવઃ ॥ ૧૩૦॥

અકારસૂર્યઃ ક્ષઃસૂર્યઃ સર્વસૂર્યઃ કૃપાનિધિઃ ।
ભૂઃસૂર્યશ્ચ ભુવઃસૂર્યઃ સ્વઃસૂર્યઃ સૂર્યનાયકઃ ॥ ૧૩૧॥

ગ્રહસૂર્ય ઋક્ષસૂર્યો લગ્નસૂર્યો મહેશ્વરઃ ।
રાશિસૂર્યો યોગસૂર્યો મન્ત્રસૂર્યો મનૂત્તમઃ ॥ ૧૩૨॥

તત્ત્વસૂર્યઃ પરાસૂર્યો વિષ્ણુસૂર્યઃ પ્રતાપવાન્ ।
રુદ્રસૂર્યો બ્રહ્મસૂર્યો વીરસૂર્યો વરોત્તમઃ ॥ ૧૩૩॥

ધર્મસૂર્યઃ કર્મસૂર્યો વિશ્વસૂર્યો વિનાયકઃ । (૧૦૦૦)
ઇતીદં દેવદેવેશિ મત્રનામસહસ્રકમ્ ॥ ૧૩૪॥

દેવદેવસ્ય સવિતુઃ સૂર્યસ્યામિતતેજસઃ ।
સર્વસારમયં દિવ્યં બ્રહ્મતેજોવિવર્ધનમ્ ॥ ૧૩૫॥

બ્રહ્મજ્ઞાનમયં પુણ્યં પુણ્યતીર્થફલપ્રદમ્ ।
સર્વયજ્ઞફલૈસ્તુલ્યં સર્વસારસ્વતપ્રદમ્ ॥ ૧૩૬॥

સર્વશ્રેયસ્કરં લોકે કીર્તિદં ધનદં પરમ્ ।
સર્વવ્રતફલોદ્રિક્તં સર્વધર્મફલપ્રદમ્ ॥ ૧૩૭॥

સર્વરોગહરં દેવિ શરીરારોગ્યવર્ધનમ્ ।
પ્રભાવમસ્ય દેવેશિ નામ્નાં સહસ્રકસ્ય ચ ॥ ૧૩૮॥

કલ્પકોટિશતૈર્વર્ષૈર્નૈવ શક્નોમિ વર્ણિતુમ્ ।
યં યં કામમભિધ્યાયેદ્ દેવાનામપિ દુર્લભમ્ ॥ ૧૩૯॥

તં તં પ્રાપ્નોતિ સહસા પઠનેનાસ્ય પાર્વતિ ।
યઃ પઠેચ્છ્રાવયેદ્વાપિ શ‌ૃણોતિ નિયતેન્દ્રિયઃ ॥ ૧૪૦॥

સ વીરો ધર્મિણાં રાજા લક્ષ્મીવાનપિ જાયતે ।
ધનવાઞ્જાયતે લોકે પુત્રવાન્ રાજવલ્લભઃ ॥ ૧૪૧॥

આયુરારોગ્યવાન્ નિત્યં સ ભવેત્ સમ્પદાં પદમ્ ।
રવૌ પઠેન્મહાદેવિ સૂર્યં સમ્પૂજ્ય કૌલિકઃ ॥ ૧૪૨॥

સૂર્યોદયે રવિં ધ્યાતા લભેત્ કામાન્ યથેપ્સિતાન્ ।
સઙ્ક્રાન્તૌ યઃ પઠેદ્ દેવિ ત્રિકાલં ભક્તિપૂર્વકમ્ ॥ ૧૪૩॥

ઇહ લોકે શ્રિયં ભુક્ત્વા સર્વરોગૈઃ પ્રમુચ્યતે ।
સપ્તમ્યાં શુક્લપક્ષે યઃ પઠદસ્તઙ્ગતે રવૌ ॥ ૧૪૪॥

સર્વારોગ્યમયં દેહં ધારયેત્ કૌલિકોત્તમઃ ।
વ્યતીપાતે પઠેદ્ દેવિ મધ્યાહ્ને સંયતેન્દ્રિયઃ ॥ ૧૪૫॥

ધનં પુત્રાન્ યશો માનં લભેત્ સૂર્યપ્રસાદતઃ ।
ચક્રાર્ચને પઠેદ્ દેવિ જપન્ મૂલં રવિં સ્મરન્ ॥ ૧૪૬॥

રવીભૂત્વા મહાચીનક્રમાચારવિચક્ષણઃ ।
સર્વશત્રૂન્ વિજિત્યાશુ લભેલ્લક્ષ્મીં પ્રતાપવાન્ ॥ ૧૪૭॥

યઃ પઠેત્ પરદેશસ્થો વટુકાર્ચનતત્પરઃ ।
કાન્તાશ્રિતો વીતભયો ભવેત્ સ શિવસન્નિભઃ ॥ ૧૪૮॥

શતાવર્તં પઠેદ્યસ્તુ સૂર્યોદયયુગાન્તરે ।
સવિતા સર્વલોકેશો વરદઃ સહસા ભવેત્ ॥ ૧૪૯॥

બહુનાત્ર કિમુક્તેન પઠનાદસ્ય પાર્વતિ ।
ઇહ લક્ષ્મીં સદા ભુક્ત્વા પરત્રાપ્નોતિ તત્પદમ્ ॥ ૧૫૦॥

રવૌ દેવિ લિખેદ્ભૂર્જે મન્ત્રનામસહસ્રકમ્ ।
અષ્ટગન્ધેન દિવ્યેન નીલપુષ્પહરિદ્રયા ॥ ૧૫૧॥

પઞ્ચામૃતૌષધીભિશ્ચ નૃયુક્પીયૂષબિન્દુભિઃ ।
વિલિખ્ય વિધિવન્મન્ત્રી યન્ત્રમધ્યેઽર્ણવેષ્ટિતમ્ ॥ ૧૫૨॥

ગુટીં વિધાય સંવેષ્ટ્ય મૂલમન્ત્રમનુસ્મરન્ ।
કન્યાકર્તિતસૂત્રેણ વેષ્ટયેદ્રક્તલાક્ષયા ॥ ૧૫૩ ॥

સુવર્ણેન ચ સંવેષ્ટ્ય પઞ્ચગવ્યેન શોધયેત્ ।
સાધયેન્મન્ત્રરાજેન ધારયેન્મૂર્ધ્નિ વા ભુજે ॥ ૧૫૪ ॥

કિં કિં ન સાધયેદ્ દેવિ યન્મમાપિ સુદુર્લભમ્ ।
કુષ્ઠરોગી ચ શૂલી ચ પ્રમેહી કુક્ષિરોગવાન્ ॥ ૧૫૫ ॥

ભગન્ધરાતુરોઽપ્યર્શી અશ્મરીવાંશ્ચ કૃચ્છ્રવાન્ ।
મુચ્યતે સહસા ધૃત્વા ગુટીમેતાં સુદુર્લભામ્ ॥ ૧૫૬ ॥

વન્ધ્યા ચ કાકવન્ધ્યા ચ મૃતવત્સા ચ કામિની ।
ધારયેદ્ગુટિકામેતાં વક્ષસિ સ્મયતર્પિતા ॥ ૧૫૭ ॥

વન્ધ્યા લભેત્ સુતં કાન્તં કાકવન્ધ્યાપિ પાર્વતિ ।
મૃતવત્સા બહૂન્ પુત્રાન્ સુરૂપાંશ્ચ ચિરાયુશઃ ॥ ૧૫૮ ॥

રણે ગત્વા ગુટીં ધૃત્વા શત્રૂઞ્જિત્વા લભેચ્છ્રિયમ્ ।
અક્ષતાઙ્ગો મહારાજઃ સુખી સ્વપુરમાવિશેત્ ॥ ૧૫૯ ॥

યો ધારયેદ્ ભુજે નિત્યં રાજલોકવશઙ્કરીમ્ ।
ગુટિકાં મોહનાકર્ષસ્તમ્ભનોચ્ચાટનક્ષમામ્ ॥ ૧૫૦ ॥

સ ભવેત્ સૂર્યસઙ્કાશો મહસા મહસાં નિધિઃ ।
ધનેન ધનદો દેવિ વિભવેન ચ શઙ્કરઃ ॥ ૧૬૧ ॥

શ્રિયેન્દ્રો યશસા રામઃ પૌરુષેણ ચ ભાર્ગવઃ ।
ગિરા બૃહસ્પતિર્દેવિ નયેન ભૃગુનન્દનઃ ॥ ૧૬૨ ॥

બલેન વાયુસઙ્કાશો દયયા પુરુષોત્તમઃ ।
આરોગ્યેણ ઘટોદ્ભૂતિઃ કાન્ત્યા પૂર્ણેન્દુસન્નિભઃ ॥ ૧૬૩ ॥

ધર્મેણ ધર્મરાજશ્ચ રત્નૈ રત્નાકરોપમઃ ।
ગામ્ભીર્યેણ તથામ્ભોધિર્દાતૃત્વેન બલિઃ સ્વયમ્ ॥ ૧૬૪ ॥

સિદ્ધ્યા શ્રીભૈરવઃ સાક્ષાદાનન્દેન ચિદીશ્વરઃ ।
કિં પ્રલાપેન બહુના પઠેદ્વા ધારયેચ્છિવે ॥ ૧૬૫ ॥

શ઼ૃણુયાદ્ યઃ પરં દિવ્યં સૂર્યનામસહસ્રકમ્ ।

સ ભવેદ્ ભાસ્કરઃ સાક્ષાત્ પરમાનન્દવિગ્રહઃ ॥ ૧૬૬॥

સ્વતન્ત્રઃ સ પ્રયાત્યન્તે તદ્વિષ્ણોઃ પરમં પદમ્ ।
ઇદં દિવ્યં મહત્ તત્ત્વં સૂર્યનામસહસ્રકમ્ ॥ ૧૬૭॥

અપ્રકાશ્યમદાતવ્યમવક્તવ્યં દુરાત્મને ।
અભક્તાય કુચૈલાય પરશિષ્યાય પાર્વતિ ॥ ૧૬૮॥

કર્કશાયાકુલીનાય દુર્જનાયાઘબુદ્ધયે ।
ગુરુભક્તિવિહીનાય નિન્દકાય શિવાગમે ॥ ૧૬૯॥

દેયં શિષ્યાય શાન્તાય ગુરુભક્તિપરાય ચ ।
કુલીનાય સુભક્તાય સૂર્યભક્તિરતાય ચ ॥ ૧૭૦॥

ઇદં તત્ત્વં હિ તત્ત્વાનાં વેદાગમરહસ્યકમ્ ।
સર્વમન્ત્રમયં ગોપ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૭૧॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે
સૂર્યસહસ્રનામસ્તોત્રનામનિરૂપણં ચતુસ્ત્રિંશઃ પટલઃ સમ્પૂર્ણઃ ॥ ૩૪॥

Proofread by DPD, Sunder Hattanagdi
The printed book from which the stotra was taken had numerous pAThabhedas.

---

*Shrisuryasahasranamastotram 2*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*